द्वादश: पाठ:

# वर्षावर्णनम्



संस्कृतसाहित्ये प्रसिद्धानि काव्यानि महाकाव्यानि च सन्ति। काव्येषु आदिकाव्यं रामायणं विश्वप्रसिद्धं वर्तते। रामायणस्य रचयिता वाल्मीकि: आदिकवि: विद्यते। अस्मिन् काव्ये सप्तकाण्डेषु भगवतो रामचन्द्रस्याखिलं चरित्रं वर्णितमस्ति। पाठोऽयं किष्किन्धाकाण्डात् अष्टाविंशसर्गात् उद्धृत:। पाठेऽस्मिन् सन्दर्भोचितं प्रकृतिवर्णनं ऋतुवर्णनं तत्रापि वर्षर्तो: मनोरमं वर्णनमस्ति।

*रज: प्रशान्तं सहिमोऽद्य वायु-*
*र्निदाघदोषप्रसरा: प्रशान्ता:।*
*स्थिता हि यात्रा वसुधाधिपानां*
*प्रवासिनो यान्ति नरा: स्वदेशान् ॥1॥*

**अन्वय:** - अद्य (पृथिव्या:) रज: प्रशान्तम् वायु: सहिम:, प्रसरा: निदाघदोषा: प्रशान्ता:, वसुधाधिपानां यात्रा स्थिता हि। प्रवासिन: नरा: स्वदेशान् यान्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| रज: | - | धूलि कण |
| सहिम: | - | बर्फ/शीतलता से युक्त |
| प्रसरा: | - | फैले हुए |
| निदाघदोषा: | - | गर्मी के दोष |
| प्रशान्ता: | - | शान्त हो गए हैं |
| वसुधाधिपानाम् | - | राजाओं की |
| प्रवासिन: | - | विदेश में निवास करने वाले |

*समुद्वहन्त: सलिलातिभारं*
*बलाकिनो वारिधरा नदन्त:।*
*महत्सु शृङ्गेषु महीधराणां*
*विश्रम्य-विश्रम्य पुन: प्रयान्ति ॥2॥*

**अन्वय:** - बलाकिन: (सुशोभिता:) वारिधरा: सलिलातिभारं समुद्वहन्त: नदन्त: महीधराणां महत्सु शृङ्गेषु विश्रम्य-विश्रम्य पुन: (अग्रे) प्रयान्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| बलाकिन: | - | बक पङ्क्तियों से |
| वारिधरा: | - | बादल |
| सलिलातिभारम् | - | पानी के अधिक भार को |
| नदन्त: | - | गर्जना करते हुए |
| महीधराणाम् | - | पर्वतों के |

| | | |
|---|---|---|
| शृङ्गेषु | - | शिखरों/चोटियों पर |
| विश्रम्य | - | विश्राम करके |
| प्रयान्ति | - | जाते हैं |

*वहन्ति वर्षन्ति नदन्ति भान्ति*
*ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।*
*नद्यो घना मत्तगजा: वनान्ता:*
*प्रियाविहीना: शिखिन: प्लवङ्गमा: ॥3॥*

**अन्वय:** - नद्य: वहन्ति, घना: वर्षन्ति, मत्तगजा: नदन्ति, वनान्ता: भान्ति, प्रियाविहीना: (प्राणिन:) ध्यायन्ति, शिखिन: नृत्यन्ति, प्लवङ्गमा: समाश्वसन्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| वहन्ति | - | बहती हैं |
| मत्तगजा: | - | मतवाले हाथी |
| नदन्ति | - | चिग्घाड़ रहे हैं |
| वनान्ता: | - | वन प्रान्त |
| भान्ति | - | सुशोभित हो रहे हैं |
| ध्यायन्ति | - | चिन्तामग्न हो रहे हैं |
| शिखिन: | - | मोर |
| प्लवङ्गमा: | - | मेंढक |
| समाश्वसन्ति | - | निश्चिन्त/सुखी हो रहे हैं |

*वर्षप्रवेगाविपुला: पतन्ति*
*प्रवान्ति वाता: समुदीर्णवेगा: ।*
*प्रणष्टकूला: प्रवहन्ति शीघ्रं*
*नद्यो जलं विप्रतिपन्नमार्गा: ॥4॥*

**अन्वय:** - विपुला: वर्षप्रवेगा: पतन्ति। वाता: समुदीर्णवेगा: प्रवान्ति। प्रणष्टकूला: विप्रतिपन्नमार्गा: नद्य: जलं शीघ्रं प्रवहन्ति।

**शब्दार्थ:** -

| | | |
|---|---|---|
| विपुला: | - | बहुत अधिक |
| वर्षप्रवेगा: | - | वर्षा का वेग |
| प्रवान्ति | - | बह रही हैं |
| प्रणष्टकूला: | - | जिनके किनारे नष्ट हो गए हैं, जल के वेग से जिन्होंने कगारों को काट दिया है |
| विप्रतिपन्नमार्गा: | - | मार्ग को रोक दिया है, मार्ग अवरुद्ध कर दिया है जिन्होंने |

*षट्पादतन्त्रीमधुराभिधानं*
*प्लवङ्गमोदीरितकण्ठतालम् ।*
*आविष्कृतं मेघमृदङ्गनादै-*
*र्वनेषु सङ्गीतमिव प्रवृत्तम् ॥5॥*

**अन्वयः -** वनेषु षट्पादतन्त्रीमधुराभिधानं, प्लवङ्गमोदीरितकण्ठतालम् मेघमृदङ्गनादैः आविष्कृतं सङ्गीतमिव प्रवृत्तम्।

**शब्दार्थः -**

| | | |
|---|---|---|
| षट्पदाः | - | भौंरे |
| तन्त्री | - | वीणा |
| प्लवङ्गमाः | - | मेंढक |
| प्रवृत्तम् | - | लगे हैं/कर रहे हैं |

*मत्ता गजेन्द्रा मुदिता गवेन्द्रा*
*वनेषु विक्रान्ततरा मृगेन्द्राः।*
*रम्या नगेन्द्रा निभृता नरेन्द्राः*
*प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥6॥*

**अन्वयः -** गजेन्द्राः मत्ताः, गवेन्द्राः मुदिताः, मृगेन्द्राः वनेषु विक्रान्ततराः नगेन्द्राः रम्याः (दृश्यन्ते) नरेन्द्राः निभृताः सुरेन्द्रः वारिधरैः प्रक्रीडितः।

**शब्दार्थः -**

| | | |
|---|---|---|
| गवेन्द्राः | - | बैल/पशुगण |
| मुदिताः | - | प्रसन्न |
| मृगेन्द्राः | - | सिंह |
| विक्रान्ततराः | - | अत्यन्तपराक्रमशाली |
| नगेन्द्राः | - | बड़े-बड़े पर्वत |
| नरेन्द्राः | - | राजा गण |
| निभृताः | - | मौन (युद्धादि उत्साह को छोड़कर) |
| सुरेन्द्रः | - | देवताओं का राजा इन्द्र |
| वारिधरैः | - | मेघों से |

*घनोपगूढं गगनं न तारा*
*न भास्करो दर्शनमभ्युपैति।*
*नवैर्जलौघैर्धरणी वितृप्ता*
*तमोविलिप्ता न दिशः प्रकाशाः ॥7॥*

**अन्वयः -** गगनं घनोपगूढं ताराः भास्करः (च) दर्शनं न अभ्युपैति। धरणी नवैः जलौघैः वितृप्ता। दिशः तमोविलिप्ताः न प्रकाशाः।

**शब्दार्थः -**

| | | |
|---|---|---|
| घनोपगूढम् | - | घने अन्धकार से आच्छादित |
| धरणी | - | धरती |
| जलौघैः | - | जल के बहने से |
| वितृप्ता | - | पूर्ण रूप से तृप्त हो गई है |
| तमोविलिप्ताः | - | अन्धकार से लिप्त |

## अभ्यास:

1. **एकपदेन उत्तरं लिखत -**

(क) समुदीर्णवेगा: के प्रवान्ति ?

(ख) वर्षाकाले शिखिन: किं कुर्वन्ति ?

(ग) वर्षाकाले के भान्ति ?

(घ) क: मृदङ्गनादम् करोति ?

(ङ) घनोपगूढं किम् ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) वारिधरा: कुत्र विश्रम्य पुन: प्रयान्ति ?

(ख) वर्षाकाले मृगेन्द्रा: कीदृशा: भवन्ति ?

(ग) वर्षाकाले धरणी कै: वितृप्ता भवति ?

(घ) वर्षाकाले के प्रशान्ता: भवन्ति ?

(ङ) सुरेन्द्र: कै: प्रक्रीडित: ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) वर्षाकाले वारिधरा: कथं प्रयान्ति ?

(ख) वर्षाकाले नद्य: कथं वहन्ति ?

(ग) वनेषु सङ्गीतं कै: कथम् आविष्कृतम् ?

4. **प्रदत्तशब्दै: रिक्तस्थानानि पूरयत -**

(मृगेन्द्रा:, वनेषु, नरा:, धरणी, वारिधरै:)

(क) प्रवासिनो यान्ति ....................... स्वदेशान्।

(ख) वनेषु विक्रान्ततरा: ....................... ।

(ग) नवैर्जलौघै: .................... वितृप्ता।

(घ) प्रक्रीडितो .................... सुरेन्द्र:।

(ङ) ............................... सङ्गीतमिव प्रवृत्तम्।

5. **यथायोग्यं योजयत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | नद्य: | वर्षन्ति |
| (ख) | घना: | वहन्ति |
| (ग) | मत्तगजा: | नृत्यन्ति |
| (घ) | वनान्ता: | नदन्ति |
| (ङ) | शिखिन: | भान्ति |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

(क) प्रवासिन: नरा: स्वदेशान् यान्ति। ☐

(ख) विपुला: वर्षप्रवेगा: पतन्ति। ☐

(ग) प्लवङ्गमा: मृदङ्गनादं कुर्वन्ति। ☐

(घ) नरेन्द्रा: निभृता:। ☐

(ङ) धरणी अतृप्ता। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा – नरा: | नर | प्रथमा | बहुवचनम् |
| (क) शिखिन: | | | |
| (ख) प्लवङ्गमा: | | | |
| (ग) नद्य: | | | |
| (घ) जलम् | | | |

8. **निम्नलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत –**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा- पतन्ति | पत् | लट् | प्रथमपुरुष: | बहुवचनम् |
| (क) यान्ति | | | | |
| (ख) प्रवहन्ति | | | | |
| (ग) प्रवान्ति | | | | |
| (घ) ध्यायन्ति | | | | |

9. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत –**

| पदम् | | सन्धिविच्छेद: | सन्धिनाम |
|---|---|---|---|
| यथा -मृगेन्द्रा: | = | मृग + इन्द्रा: | गुणसन्धि: |
| (क) नद्यो जलम् | | | |
| (ख) घनोपगूढम् | | | |
| (ग) जलौघै: | | | |
| (घ) सहिमोऽद्य | | | |

**10. अधोलिखितान् उपसर्गान् योजयित्वा शब्दनिर्माणं कुरुत -**

| उपसर्गः | + | मूलशब्दः | = | उपसर्गयुक्तशब्दः |
|---|---|---|---|---|
| यथा -प्र | + | शान्तम् | = | प्रशान्तम् |

(क) प्रति

(ख) वि

(ग) अधि

(घ) सम्

(ङ) उत्

**11. अधोलिखितानां शब्दानां पर्यायशब्दान् लिखत -**

यथा -वायुः = पवनः

(क) नराः

(ख) वारिधराः

(ग) शिखिनः

(घ) प्लवङ्गमाः

(ङ) महीधराणाम्

## योग्यताविस्तारः -

- पाठे समागतानां श्लोकानां लयबद्धगानं कुरुत।
- महर्षिवाल्मीकेः जीवनवृत्तान्तं पठत।
- रामायणग्रन्थतः प्रकृतिचित्रणविषयकान् (पाठेतरान्) दशश्लोकान् लिखत।
- रामायणग्रन्थस्य सप्तकाण्डानां नामानि लिखत।
- ''वर्षर्तुः'' इतिविषयमवलम्ब्य संस्कृते निबन्धरचनां कुरुत।